# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर/दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ८** | गुणाः - ७० |
| विषयः – वेद: | **कोड – C.E.1.1.2** | समयः – ३: ००त: ६:०० |
| दिनाङ्कः – १४-१२-२०१६ | सन्दर्भग्रन्थः –शुक्लयजुर्वेदसंहित | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १  अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** ०८

(१) वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥

(२) अह्रु तमसि हविर्धानं दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत्।
विष्णुस्त्वाक्रमतामुरु वातायापहतꣳ रक्षो यच्छन्तां पञ्च॥

(३) पवित्रे स्थो वैष्णव्यौ सवितुर्व: प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
देवी रापो अग्रेगुवो अग्रेपुवोऽग्र इममद्य यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवायुवम्॥

**प्रश्नः – २  व्रतग्रहणविधिं यथाशास्त्रं समन्त्रकं प्रतिपादयत।** ०८

**अथवा**

**पलाशशाखाच्छेदनं वत्सापकरणविधानञ्च विवृणुत।**

**प्रश्नः – ३  निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) कृष्णाजिनादानम्  (३) हविग्रहणम्
(२) दृषदुपले  (४) पिष्टान्यावपति

**प्रश्नः – ४  अधोलिखितेषु पञ्चानाम् अर्थं लिखत।** ०५

(१) ऊर्जः  (४) राय:  (७) अरातय:
(२) पवित्रे  (५) पार्वतेयी  (८) शमीष्व
(३) बृहद्ग्रावासि  (६) इष

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५  अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या विधेया।** ०८

(१) गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि
जागतेन त्वा छन्दसा परिगृह्णामि।

(२) प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः।
अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि॥

(३) उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहा।
देवस्य त्वा सवितु: प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णाम्यग्नेष्ट्वास्ये प्राश्नामि॥

**प्रश्नः – ६ वेदिनिर्माणविधिं यथाशास्त्रं विवृणुत** ०८

**अथवा**

**दर्शपूर्णमासयगस्य सामान्यपरिचयः प्रस्तूयताम् ।**

**प्रश्नः – ७ निम्नलिखितेषु टिप्प्पणीद्वयं लिखत।** ०४

(१) आज्यमवेक्षणम् (३) इध्मप्रोक्षणम्

(२) वेदिपरिग्रहम् (४) दर्शपूर्णमासयागे ऋत्विक्

**प्रश्नः – ८ अधोलिखितेषु पञ्चानाम् अर्थं लिखत ।** ०५

(१) विष्णुः (४) यज्ञपतिम् (७) सुक्ष्मा

(२) सम्मार्ज्मि (५) वेदि: (८) प्रस्तर:

(३) अध्वरम् (६) जुहू

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु मन्त्रेषु कयोश्चिद् द्वयोः व्याख्या विधेया।** ०८

(१) घृताची स्थो धुर्यौ पात॑सुम्ने स्थ: सुम्ने मा धतम् ।
यज्ञ नमश्च त उप च यज्ञस्य शिवे संतिष्ठस्व स्विष्टे मे संतिष्ठस्व ॥

(२) स्वयंभूरसिश्रेष्ठो रश्मिर्वचोदा असि वर्चो मे देहि।
सूर्यस्यावृतमन्वावर्ते ॥

(३) अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा।
अपहता असुरा रक्षा॑सि वेदिषदः ॥

**प्रश्नः – १० परिधिपरिधानविधिं विवेचयत।** ०८

**अथवा**

**शुक्लयजुर्वेदस्य महत्वं वैशिष्ट्यं च विवृणुत**

**प्रश्नः – ११ टिप्प्पणीं लिखत। (एकस्य)** ०२

(१) षड्वा ऋतवः पितरः (२) दक्षिणाग्नि:

**प्रश्नः – १२ अधोनिर्दिष्टेषु द्वयो: लघूत्तरं यच्छ।** ०२

(१) 'कव्यवाहनः' इति शब्दस्य कोऽर्थः ?

(२) शुक्लयजुर्वेदस्य के सन्ति भाष्यकारा ?

(३) दर्शपूर्णमासयागस्य कालः क: ?

(४) शुक्लयजुर्वेद कस्य सम्प्रदायस्य पुष्टिं करोति?

***